# मंगलाबाई भागवत फाऊंडेशन


विषय : संस्कृत (संपूर्ण)

वेळ : ३ तास | कक्षा : दशमी | एकूण गुण – 80

सूचना : 1) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम् ।
2) यथासूचनं आकलनकृतय: व्याकरणकृतय: आरेखितव्या: ।
3) आकृतीनाम् आलेखनं कर्तव्यम् ।

## प्रथम विभाग : सुगमसंस्कृतम् । (८)

**प्र. 1. अ) चित्रं दृष्ट्वा नामानि लिखत । (5 त: 4)** **(4)**




**आ) सङ्ख्या अक्षरै:/अङ्कै: लिखत । (3 त: 2)** **(2)**

1) ७८ 2) ३६ 3) चतुर्नवति:

**इ) समय–स्तम्भमेलनं कुरुत ।** **(2)**

| 'अ' | 'ब' |
|---|---|
| 1) ३.५० | 1) पञ्चोन पञ्चवादनम् |
| 2) ३.४५ | 2) सपाद चतुर्वादनम् |
| 3) ४.१५ | 3) दशोन चतुर्वादनम् |
| 4) ४.५५ | 4) पादोन चतुर्वादनम् |

## द्वितीयः विभागः – गद्यम्। (२०)

**प्र.२ अ) गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत ।** **(7)**

1) **अवबोधनम् । (4 त: 3)** **(3)**

**क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

प्रोफेसर सर्कसवाले चिमणरावस्य शिबिरम् आगत: यत: .......

i) स: चिमणरावस्य सखा अस्ति।

ii) स: चिमणरावस्य साहाय्यम् ऐच्छत्।

iii) स: बालवीरेभ्य: सर्कसक्रिडांद्रष्टुम् निमन्त्रणंदातुम् ऐच्छत्।

शिबिरस्य प्रथमदिने एव भोजनादिकं समाप्य मध्याह्ने बालै: सह पत्रक्रीडायां मग्न: आसम् अहम्। तदा सद्य: एव परिचित: प्रोफेसर – सर्कसवाले (सर्कस-क्रीडारङ्गस्य स्वामी) मामेव अन्विष्यन् तत्र समागत:। "कॅप्टनसाहेब, शृणोतु कॅप्टनसाहेब! अस्माकं सर्कसक्रीडाया कतिपयेभ्य: मासेभ्य: लोकप्रिय: सहभोजनकार्यक्रम: प्रचलति। गौ:, भल्लूक: व्याघ्रश्च इत्येतेषाम् पशूनाम् अयं कार्यक्रम: प्रयोगस्य सर्वोच्चम् आकर्षणम् अस्ति। तथा विज्ञापनं कृत्वा प्रवेशपत्राणि अपि विक्रीतानि। परन्तु व्याघ्र-भल्लूकयो: कलहकारणात् द्वावपि व्रणितौ।" "किं प्राणिनो: कलह:?" "महाशय, अस्माकं सर्कसक्रीडायां तु व्याघ्र-भल्लूकौ द्विपादौ एव।" एवं प्राध्यापकमहाशयेन रहस्यभेद: कृत:। "नास्ति अस्माकम् सामर्थ्यं व्याघ्रं वा भल्लूकं वा पालयितुम। क्रीडायां द्वौ बहुरूपपारिणौ नरौ एव व्याघ्रं भल्लूकं च नाटयत:।" "किं धेनुरपि...?" "नहि नहि, धेनुस्तु वास्तविकी एव।" "हंऽऽ... कथयतु तर्हि किं मया करणीयम् अत्र?" "अहं प्रार्थये यत् भवत: बालवीरचमूत: कौ अपि द्वौ सैनिकौ अद्यतनक्रीडायां यदि व्याघ्र-भल्लूकवेषौ धृत्वा प्रेक्षकाणां मनोरञ्जनं कुर्यातां तर्हिं महान् उपकार: स्यात्। कृपया साहाय्यं करोतु।"

**ख) क: कं वदति।**

"धेनुस्तु वास्तविकी एव।"

**ग) पूर्ण वाक्येन उत्तरत।**

सर्कसक्रीडायां लोकप्रिय: कार्यक्रम: क: अस्ति?

**घ) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् वा इति लिखत।**

धेनु-भल्लूकौ द्वौ अपि व्रणितौ।

२) **शब्दज्ञानम् (3 तः 2)** **(2)**

**क) गद्यांशात् द्वे पूर्वकालवाचक-धातुसाधित अव्यये चित्वा लिखत ।**

**ख) गद्यांशात् विशेषणं चित्वा लिखत।**

1) ----------- नरौ । 2) ------------ मासेभ्य: ।

**ग) पूर्वपदं लिखत ।**

i) नास्ति = ------------------- + अस्ति ।

ii) व्याघ्रश्च = ---------- + च ।

३) **पृथक्करणम् क्रमेणयोजयत।** **(2)**

i) रहस्यभेद: । ii) साहाय्यार्थं प्रार्थना।

iii) पत्रक्रीडामग्न: चिमणराव:। iv) सर्कसक्रीडारङ्गस्य स्वामिन: आगमनम्।

**प्र. 2 आ) गद्यांश पठित्वा निर्दिष्टाः कृतीः कुरुत।** **(7)**

१) **अवबोधनम् (4 तः 3)** **(3)**

**क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

i) (विज्ञान/विधि) ....... शाखाया: पदवी अपि मया प्राप्ता।

ii) (स्यूतात्/हस्तात्) ....... किमपि संस्कृतपुस्तकं दर्शयति।

**ख) पूर्णवाक्येन उत्तरं लिखत। ?**

काव्यमाध्यमेन किं सुगम: भवति?

**ग) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।**

महोदया व्यवस्थापन प्रशिक्षिका नास्ति।

**घ) अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत।**

प्रसाद: समीरस्य मित्रम्।

२) **शब्दज्ञानम् । (3 तः 2)** **(2)**

**क) प्रश्न निर्माणं कुरूत।**

युवका: गोष्ठिषु रता:।

**ख) उत्तरपदं लिखत।**

i) अधुनैव = अधुना + ----------- ।


ii) तद्नुसृत्य = तत् + ----------।

**ग) लकारं लिखत ।**

संस्कृतग्रन्थानाम् अध्ययनं साहाय्यकरं <u>भवेत्</u>।

३) **पृथक्करणम् ।** **(2)**

गद्यांशात उचिताम् शब्दान् चित्वा जालरेखाचित्रं पूरयत ।




इ) **माध्यमभाषया सरलार्थं लिखत । (2 तः 1)** **(4)**

१) रदनिका – एहि वत्स! शकटिकया क्रीडाव:।

दारक: – (सकरूणम्) रदनिके! किंमम एतया मृत्तिका – शकटिकया तामेव सौवर्णशकटिकां देहि।

रदनिका – (सनिर्वेदं निश्वस्य) जात। कुतोऽस्माकं सुवर्णव्यवहार:? तातस्य पुनरपि ऋध्दया सुवर्णशकटिकया क्रीडिण्यसि।

२) विश्वमित्र – न हि मात:, नैतत् शक्यम्। सर्वा: सरित: सुखं वदन्तु। सर्वेजना: सुखिन: सन्तु। (विश्वामित्र: निर्गच्छति।)

कीर्तनकार: – एवं विश्वामित्र:, नद्यौ प्रीणयित्वा परतीरं गतवान्। अयि श्रोतार:, इत्थं नद्य: मानवा: च परस्परं प्रीणयन्त: संस्कृतिं वधितवन्त:।

ई) **माध्यमभाषया उत्तरं लिखत । (2 तः 1)** **(2)**

१) 'स नर: शत्रुनन्दन:' इति वचनं कथाया: आधारेण स्पष्टीकुरूत।

२) सुदास: सुगतचरणाभ्यां कमलं किमर्थं समर्पितवान् ?

## तृतीयः विभागः – पद्यम्। (१८)

प्र.३ अ) **पद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत ।** **(4)**

विद्या नाम नरस्य रूपमधिकं प्रच्छन्न गुप्तं धनम्।
विद्या भोगकरी यश: सुखकरी विद्या गुरूणां गुरु:।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम्।
विद्या राजसु पूज्यते न तु धनं विद्याविहीन: पशु:।।
घटं भिन्द्यात् पटं छिन्द्यात् कुर्याद्रासभ रोहणम्।
येन केन प्रकारेण प्रसिध्द: पुरुषो भवेत्।
यथैव सकला नद्य: प्रविशन्ति महोदधिम्।
तथा मानवताधर्म सर्वे धर्मा: समाश्रिता:।।

**1) पद्यांशं पठित्वा निर्दिष्टे: कृती: कुरुत । (3 तः 2)** **(2)**

**क) पूर्णवाक्येन उत्तरं लिखत ।** (1)


कीदृश: नर: पशु: ?

**ख) पद्यांशात् विशेषणं चित्वा लिखत।** (1)

1) ------------ पुरुष: । 2) ------------- धर्मा:।

**ग) सन्धिविग्रहं कुरुत। – कुर्याद्ग्रासभरोहणम्** (1)

**2) जालरेखाचित्रं पूरयत ।** **(2)**




**आ) माध्यम भाषया उत्तरं लिखत । (2 तः 1)** **(2)**

i) जटायुरावणयो: सङ्घर्षस्य वर्णनं कुरुत।

ii) 'कं संजधान कृष्ण:' इति श्लोकं स्पष्टीकुरुत ।

**इ) पद्ये शुद्धे पूर्णे च लिखत । (क, ख, तः। ग,घ, तः ।)** **(6)**

1) क) यदा किञ्चिऽज्ञोहं ---------- व्यपगत: ।।

ख) अयं न भक्तो ---------- निर्धनो वा ।।

2) ग) राक्षसेभ्य: ----------- स पण्डित: ।।

घ) अल्पानामपि ---------- मत्तदन्तिन: ।।

**ई) अन्वयं पूरयत ।** **(2)**

--- आत्मनं: --- बध्यन्ते। तत्र --- न बध्यन्ते। (अत:) --- सर्वार्थसाधनम् ।

**उ) माध्यमभाषया सरलार्थं लिखत । (3 तः 2)** (4)

i) यथा प्रकाशत्येको भानुर्भुवनमण्डलम्।
धर्मान् प्रकाशयत्येकस्तया मानवतागुण:।।

ii) अद्ययावध्दि ज्ञानाय वृत्तपत्रं पठेत्सदा।
सर्व विध सुविद्यार्थं वाचनमुपकारकम् ।।

iii) मनुजा वाचनेनैव बोधन्ते विषयान् बहून्।
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुता:।।

## चतुर्थ: विभागः – लेखनकौशलम्। (९)

**प्र. ४. अ) धातूनाम् अव्ययानां च उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (6 तः 4)** **(4)**

i) प्रति ii) ऋते iii) स्पृह् iv) स्निह् v) बहि: vi) विना

**अथवा**

**संस्कृतानुवादं कुरुत । (6 तः 4)**


| | |
|---|---|
| १) हे माझे पायमोजे आहेत. | These are my socks. |
| २) आई मला एक पोळी दे. | Mother, give me a chapati. |
| ३) मला साखर आवडते. | I like Sugar. |
| ४) बाबा उद्या दिल्लीला जातील. | Father will go Delhi, tomorrow. |
| ५) राम वनात का गेला? | Why did Rama go to the Forest? |
| ६) शेतकरी शेत नांगरतो. | The farmer ploughs the field. |

**आ) 5/7 वाक्यत्मकं निबन्धं लिखत । (3 तः 1)** **(5)**

१) मम प्रिया भाषा । २) मम प्रिय: विहग: । ३) भारतीय प्रसिध्दं स्थलम् ।

**अथवा**

**साहाय्यक–शब्दानाम् आधारेण 5/7 वाक्यात्मकं चित्रवर्णनं कुरुत ।**




ञ्जूषा – ददाति, गृह्णाति, नयति, विक्रीणीते, स्वीकरोति, वहति, पचति)

## पञ्चम: विभाग: – भाषाभ्यास:। (१७)

**प्र. 5 अ) तालिकापूर्तिं कुरुत । (8)**

**1) नामतालिकां पूरयत । (6 तः 4) (2)**

| विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | राजा | --------- | --------- |
| तृतीया | --------- | --------- | वंणिग्भि: |
| पञ्चमी | दिश: | --------- | --------- |

**2) सर्वनामतालिकां पूरयत । (6 तः 4) (2)**

| विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| द्वितीया | भवन्तम् | --------- | --------- |
| चतुर्थी | --------- | आभ्याम् | --------- |
| षष्ठी | --------- | --------- | सर्वासु |

**३) क्रियापदतालिकां पूरयत । (6 तः 4) (2)**

| पुरुष: | लकार: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| उत्तम: | लिङ् | जानीय | ------ | ------ |
| मध्यम: | लोट् | --------- | दत्तम् | ----- |
| प्रथम: | लुट् | --------- | ------ | भोक्ष्यन्ते |

**४) धातुसाधित-विशेषण-तालिका । (6 तः 4) (2)**

| धातु: | क्त | क्तवतु | कृत्या: | शतृ/शानच् |
|---|---|---|---|---|
| नृत (४प.प.) | ------ | ------ | नृत्य: | नृत्यन् |
| क्च् (२प.प.) | उक्त: | उक्तवान् | ------ | ------ |
| लभ् (१आ.प.) | लब्ध: | ------ | ------ | लभमान: |

**आ) निर्दिष्टा: कृती: कुरुत । (4 तः 3) (9)**

(१) योग्यं रूपं लिखित्वा रिक्त स्थानपूर्तिं कुरुत । (5 तः 3) (3)

i) ................ वेदा: वर्तन्ते । (४ सङ्ख्यावाचकम्)

ii) ............ भवने योगेश: निवसति। (२ क्रमवाचकम्)

iii) सप्ताहस्य ........... संस्कृतवर्ग: भवति। (३ आवृत्तिवाचकम्)

iv) भोजने .............. रसेषु मधुर: रस: मम प्रिय:। (६ सङ्ख्यावाचकम्)

v) वर्षस्य .............. परीक्षा भवति । (४ आवृत्तिवाचकम्)

**(२) समासानां तालिकापूर्तिं कुरुत । (5 तः 3)** **(3)**

| समस्तपदम् | विग्रह: | समासनाम |
|---|---|---|
| i) अनल्पम् | .............. | नञ् तत्पुरुष । |
| ii) ............. | चरणाभ्यां विकल:। | चतुर्थी तत्पुरुष । |
| iii) सूक्तिसुधा | सूक्ति: सुधा इव। | ............. । |
| iv) कुम्भकार : | ............... | उपपद तत्पुरुष । |
| v) ............. | शक्तिम् अनुसृत्य | अव्ययीभाव:। |

**३) समानार्थकशब्दान् / विरुद्धार्थकशब्दान् लिखत । (5 तः 3)** (3)

i) श्लाघ्य: = ............ । ii) अग्रज: x ............ । iii) महिला = ........... ।

iv) पण्डित: x ........... । v) राजा = ........... ।

**४) सूचनानुसारं कृती: कुरुत । (5 तः 3)** (3)

i) अस्माभि: संस्कृतस्य अध्ययनं कृतम् । (वाच्यपरिवर्तनं कुरुत ।)

ii) य : जानाति स पण्डित:। (बहुवचने परिवर्तयत।)

iii) वृक्ष: वर्धते। ('बालक:' इति कर्तृपदं प्रयुज्यं णिजन्तं कुरुत ।)

iv) पाकगृहं गत्वा तण्डुलान् आनय । (पूर्वकालवाचकं निष्कासयत।)

v) त्वं किम् इच्छसि?। ('त्वम्' स्थाने 'भवान्' योजयत।)

## षष्ठ: विभाग: – अपठितम्:। (८)

**प्र. ६. अ) गद्यांशं पठित्वा कृती: कुरुत । (6 तः 4)** **(4)**

एकस्मिन् वने एक: विशाल: वृक्ष: आसीत्। तस्मिन् बहव: खगा: वसन्ति स्म । एकदा ते अतीव बुभुक्षिता: आसन्। अत: भोजनं खादितुम् इतस्तत: भ्रमन्ति स्म। ते दूरं दूर गच्छन्ति स्म। अन्ते च एकस्मिन् क्षेत्रे तण्डुलकणान् अपश्यन्। ते तत्र गत्वा प्रसन्नतया तण्डुलान् खादन्ति स्म परन्तु जालेन बध्दा: अभवन्। अधुना किं करणीयम् इति चिन्त यित्वा ते सर्वे जालेन सह एव एकं स्वमित्रम् उपागच्छन्। तेषां मित्रम् एक: मूषक: आसीत्। स: जालं दन्तै: अकर्तयत्। अन्ते सर्वे स्वतन्त्रा: भूत्वा अनृत्यन् अगायन् च–सुखं तु एकतायाम् एव विद्यते।

१) **एकवाक्येन उत्तरत।**

खगानां साहाय्यं केन कृतम्?

२) **प्रातिपदिकं लिखत ।**

i) जालेन ii) स: ।

३) **वाक्यं पुनर्लिखित्वा सत्यम् वा असत्यम् वा इति लिखत ।**

खगा: स्वसामर्थ्येन स्व तन्त्रा: अभवन् ।

४) **माध्यमभाषया सरलार्थं लिखत ।**

सुखं तु एकतायाम् एव विद्यते ।

५) **गद्यांशात् द्वे लट्लकारे चित्वा लिखत ।**

६) **कारकपरिचयं कुरुत ।**

स: जालं दन्तै: अकर्तयत् ।

**आ) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत । (4)**

| |
|---|
| वृथा वृष्टि: समुद्रेषु वृथा तृप्तस्य भोजनम् ।<br>वृथा दानं समर्थस्य वृथा दीपो दिवापि च । |

**1) (क) पूर्णवाक्येन उत्तरत । (2 तः 1) (1)**

1) केषु वृथा वृष्टि: ?

2) भोजनम् कस्य वृथा?


**ख) समानार्थकं शब्दं पद्यांशात् चित्वा लिखत । (1)**

दिवा = --------

**2) पद्यांशं पठित्वा जालरेखाचित्रं पूरयत । (2)**

व्यसने मित्र परीक्षा शूरपरीक्षा रणाङ्गणे भवति।

विनये भृत्यपरीक्षा दानपरीक्षा च दुर्भिक्षे।।




******